# .. AnandalaharI ..

# ॥ આનન્દલહરી ॥

## Document Information

Text title : AnandalaharI

File name : aanandal.itx

Category : laharI

Location : doc_devii

Author : Shankaracharya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : S.V.Ganesan and P. P. Narayanaswami (swami at math.mun.ca)

Proofread by : S.V.Ganesan and P. P. Narayanaswami (swami at math.mun.c

Latest update : October 1, 2010

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ આનન્દલહરી ॥

ભવાનિ સ્તોતું ત્વાં પ્રભવતિ ચતુર્ભિર્ન વદનૈઃ
પ્રજાનામીશાનસ્ત્રિપુરમથનઃ પઞ્ચભિરપિ ।
ન ષડ્ભિઃ સેનાનીર્દશશતમુખૈરપ્યહિપતિઃ
તદાન્યેષાં કેષાં કથય કથમસ્મિન્નવસરઃ ॥ ૧॥

ધૃતક્ષીરદ્રાક્ષામધુમધુરિમા કૈરપિ પદૈઃ
વિશિષ્યાનાખ્યેયો ભવતિ રસનામાત્ર વિષયઃ ।
તથા તે સૌન્દર્યં પરમશિવદૃઙ્માત્રવિષયઃ
કથંકારં બ્રૂમઃ સકલનિગમાગોચરગુણે ॥ ૨॥

મુખે તે તામ્બૂલં નયનયુગળે કજ્જલકલા
લલાટે કાશ્મીરં વિલસતિ ગળે મૌક્તિકલતા ।
સ્ફુરત્કાઞ્ચી શાટી પૃથુકટિતટે હાટકમયી
ભજામિ ત્વાં ગૌરીં નગપતિકિશોરીમવિરતમ્ ॥ ૩॥

વિરાજન્મન્દારદ્રુમકુસુમહારસ્તનતટી
નદદ્વીણાનાદશ્રવણવિલસત્કુણ્ડલગુણા
નતાઙ્ગી માતઙ્ગી રુચિરગતિભઙ્ગી ભગવતી
સતી શમ્ભોરમ્ભોરુહચટુલચક્ષુર્વિજયતે ॥ ૪॥

નવીનાર્કભ્રાજન્મણિકનકભૂષણપરિકરૈઃ
વૃતાઙ્ગી સારઙ્ગીરુચિરનયનાઙ્ગીકૃતશિવા ।
તડિત્પીતા પીતામ્બરલલિતમઞ્જીરસુભગા
મમાપર્ણા પૂર્ણા નિરવધિસુખૈરસ્તુ સુમુખી ॥ ૫॥

હિમાદ્રેઃ સંભૂતા સુલલિતકરૈઃ પલ્લવયુતા
સુપુષ્પા મુક્તાભિર્ભ્રમરકલિતા ચાલકભરૈઃ ।
કૃતસ્થાણુસ્થાના કુચફલનતા સૂક્તિસરસા
રુજાં હન્ત્રી ગન્ત્રી વિલસતિ ચિદાનન્દલતિકા ॥ ૬॥

સપર્ણામાકીર્ણાં કતિપયગુણૈઃ સાદરમિહ
શ્રયન્ત્યન્યે વલ્લીં મમ તુ મતિરેવં વિલસતિ ।
અપર્ણૈકા સેવ્યા જગતિ સકલૈર્યત્પરિવૃતઃ
પુરાણોઽપિ સ્થાણુઃ ફલતિ કિલ કૈવલ્યપદવીમ્ ॥ ૭॥

વિધાત્રી ધર્માણાં ત્વમસિ સકલામ્નાયજનની
ત્વમર્થાનાં મૂલં ધનદનમનીયાંઘ્રિકમલે ।

ત્વમાદિઃ કામાનાં જનનિ કૃતકન્દર્પવિજયે
સતાં મુક્તેર્બીજં ત્વમસિ પરમબ્રહ્મમહિષી ॥ ૮॥

પ્રભૂતા ભક્તિસ્તે યદપિ ન મમાલોલમનસઃ
ત્વયા તુ શ્રીમત્યા સદયમવલોક્યોઽહમધુના ।
પયોદઃ પાનીયં દિશતિ મધુરં ચાતકમુખે
ભૃશં શઙ્કે કૈર્વા વિધિભિરનુનીતા મમ મતિઃ ॥ ૯॥

કૃપાપાઙ્ગાલોકં વિતર તરસા સાધુચરિતે
ન તે યુક્તોપેક્ષા મયિ શરણદીક્ષામુપગતે ।
ન ચેદિષ્ટં દદ્યાદનુપદમહો કલ્પલતિકા
વિશેષઃ સામાન્યૈઃ કથમિતરવલ્લીપરિકરૈઃ ॥ ૧૦॥

મહાન્તં વિશ્વાસં તવ ચરણપઙ્કેરુહયુગે
નિધાયાન્યન્નૈવાશ્રિતમિહ મયા દૈવતમુમે ।
તથાપિ ત્વચ્ચેતો યદિ મયિ ન જાયેત સદયં
નિરાલમ્બો લમ્બોદરજનનિ કં યામિ શરણમ્ ॥ ૧૧॥

અયઃ સ્પર્શે લગ્નં સપદિ લભતે હેમપદવીં
યથા રથ્યાપાથઃ શુચિ ભવતિ ગંગૌઘમિલિતમ્ ।
તથા તત્તત્પાપૈરતિમલિનમન્તર્મમ યદિ
ત્વયિ પ્રેમ્ણાસક્તં કથમિવ ન જાયેત વિમલમ્ ॥ ૧૨॥

ત્વદન્યસ્માદિચ્છાવિષયફલલાભે ન નિયમઃ
ત્વમર્થાનામિચ્છાધિકમપિ સમર્થા વિતરણે ।
ઇતિ પ્રાહુઃ પ્રાઞ્ચઃ કમલભવનાદ્યાસ્ત્વયિ મનઃ
ત્વદાસક્તં નક્તં દિવમુચિતમીશાનિ કુરુ તત્ ॥ ૧૩॥

સ્ફુરન્નાનારત્નસ્ફટિકમયભિત્તિપ્રતિફલ
ત્ત્વદાકારં ચઞ્ચચ્છશધરકલાસૌધશિખરમ્ ।
મુકુન્દબ્રહ્મેન્દ્રપ્રભૃતિપરિવારં વિજયતે
તવાગારં રમ્યં ત્રિભુવનમહારાજગૃહિણિ ॥ ૧૪॥

નિવાસઃ કૈલાસે વિધિશતમખાદ્યાઃ સ્તુતિકરાઃ
કુટુમ્બં ત્રૈલોક્યં કૃતકરપુટઃ સિદ્ધિનિકરઃ ।
મહેશઃ પ્રાણેશસ્તદવનિધરાધીશતનયે
ન તે સૌભાગ્યસ્ય ક્વચિદપિ મનાગસ્તિ તુલના ॥ ૧૫॥

વૃષો વૃદ્ધો યાનં વિષમશનમાશા નિવસનં
શ્મશાનં ક્રીડાભૂર્ભુજગનિવહો ભૂષણવિધિઃ

સમગ્રા સામગ્રી જગતિ વિદિતૈવ સ્મરરિપોઃ
યદેતસ્યૈશ્વર્યં તવ જનનિ સૌભાગ્યમહિમા ॥ ૧૬॥

અશેષબ્રહ્માણ્ડપ્રલયવિધિનૈસર્ગિકમતિઃ
શ્મશાનેષ્વાસીનઃ કૃતભસિતલેપઃ પશુપતિઃ ।
દધૌ કણ્ઠે હાલાહલમખિલભૂગોલકૃપયા
ભવત્યાઃ સંગત્યાઃ ફલમિતિ ચ કલ્યાણિ કલયે ॥ ૧૭॥

ત્વદીયં સૌન્દર્યં નિરતિશયમાલોક્ય પરયા
ભિયૈવાસીદ્ગંગા જલમયતનુઃ શૈલતનયે ।
તદેતસ્યાસ્તસ્માદ્વદનકમલં વીક્ષ્ય કૃપયા
પ્રતિષ્ઠામાતન્વન્નિજશિરસિવાસેન ગિરિશઃ ॥ ૧૮॥

વિશાલશ્રીખણ્ડદ્રવમૃગમદાકીર્ણઘુસૃણ
પ્રસૂનવ્યામિશ્રં ભગવતિ તવાભ્યઙ્ગસલિલમ્ ।
સમાદાય સ્રષ્ટા ચલિતપદપાંસૂન્નિજકરૈઃ
સમાધત્તે સૃષ્ટિં વિબુધપુરપઙ્કેરુહદૃશામ્ ॥ ૧૯॥

વસન્તે સાનન્દે કુસુમિતલતાભિઃ પરિવૃતે
સ્ફુરન્નાનાપદ્મે સરસિ કલહંસાલિસુભગે ।
સખીભિઃ ખેલન્તીં મલયપવનાન્દોલિતજલે
સ્મરેદ્યસ્ત્વાં તસ્ય જ્વરજનિતપીડાપસરતિ ॥ ૨૦॥

॥ ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતા આનન્દલહરી સમ્પૂર્ણા ॥

Encoded by S.V.Ganesan (deepa at tiac.net) and
P. P. Narayanaswami (swami at math.mun.ca)

.. AnandalaharI ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*